CLASS : 12th (Sr. Secondary) **Code No. 4305**

**Series : SS-M/2019**

*रोल नं०* | | | | | | | | | | |

***SET : C***

# संस्कृत

## SANSKRIT

***ACADEMIC/OPEN***

(Only for Fresh/Re-appear Candidates)

*समय : **3** घण्टे ]* *[ पूर्णांक : **80***

- *कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **8** तथा प्रश्न **17** हैं।*
- *प्रश्न-पत्र में दाहिने हाथ की ओर दिये गये **कोड नम्बर** तथा **सेट** को छात्र उत्तर-पुस्तिका के मुख्य-पृष्ठ पर लिखें।*
- *कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।*
- *उत्तर-पुस्तिका के बीच में खाली पन्ना/पन्ने न छोड़ें।*
- *उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।*
- *परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें।*
- *कृपया प्रश्नों का उत्तर देने से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।***



StudentSuvidha.com
downloaded from
OTES and PAPERS at StudentSuvidha.com

*निर्देशः –*

*(i) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।*

*(ii) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।*

*(iii) श्रेष्ठाङ्कान् प्राप्तये सुवाच्यलेखोऽपेक्ष्यते।*

**खण्डः 'क'**

**(अपठित-अवबोधनम्)**

**1.** अधोलिखितं गद्यांशं पठित्वा निम्नाङ्कितानां प्रश्नानाम् उत्तराणि संस्कृतपूर्णवाक्येन लिखत –

संसारस्य प्रायेण सर्वेष्वपि देशेषु ऋतुराजवसन्तस्य स्वागतोत्सवः क्रियते। भारतवर्षे तु विशेषेण नवान्नस्य आगमनकालोऽयम्। अत एव नवधान्यं गृहे दृष्ट्वा कृषकाः हर्षन्ति सोत्साहं चोत्सवं कुर्वन्ति। इदमपि किल स्मर्यते यत् पुरा खलु हिरण्यकशिपुर्नाम देवरिपुरासीत्। सः हरि भक्ति परायणं प्रह्लादनामानं स्वसुतं भस्मीकर्तुकामोऽभवत्। तस्य स्वसा होलिका तत्कर्मसम्पादनाय प्रवृत्ता। तत्र च होलिका वराकी भस्मी भूता, भगवत्प्रसादात् च अग्निज्वालाऽवलीढोऽपि प्रह्लादः सुरक्षितः आसीत्। तस्मादेव च लोकैः प्रतिवर्षं होलिकादाहो विधीयते।

*प्रश्नाः* – 2 × 5 = 10

(क) सर्वेषु देशेषु कस्य स्वागतोत्सवः क्रियते ?

(ख) नवधान्यं गृहे दृष्ट्वा के हर्षन्ति ?



downloaded from StudentSuvidha.com

NOTES and PAPERS at StudentSuvidha.com

(ग) देवरिपोः नाम किम् आसीत् ?

(घ) हिरण्यकशिपोः सुतः कः आसीत् ?

(ङ) हिरण्यकशिपोः स्वसा का आसीत् ?

**खण्डः 'ख'**

**(रचनात्मकं – कार्यम्)**

**2.** ***विषयमेकमधिकृत्य*** लघुनिबन्धं संस्कृतभाषया लिखत – 6

(क) स्वच्छतायाः महत्त्वम्।

(ख) संस्कृतभाषायाः महत्त्वम्।

(ग) महात्मागान्धी।

**खण्डः 'ग'**

**(पठित – अवबोधनम्)**

**3.** अधोलिखितगद्यांशस्य हिन्दीभाषया सरलार्थं कार्यम् – 4

(क) गतस्य वर्षत्रयस्य आकलनात् ज्ञायते यद्विभागस्य कार्यनैपुण्यं दशगुणैः वर्धितम्। खाद्ये अपमिश्रणं न्यूनीभूतम्। अतः उपभोक्तॄणामपि अभियोगो नास्ति विभागस्य विपक्षे। मन्त्रिणां मध्येऽपि तस्य सुख्यातिः वर्तते।



downloaded from StudentSuvidha.com

Download all NOTES and PAPERS at StudentSuvidha.com

**अथवा**

(ख) निरन्तरम् आत्मोन्नतये चेष्टमानाः लोभाक्रान्तहृदयाः मनुजन्मानः किल प्रतिक्षणं स्वार्थसाधनाय सर्वात्मना प्रवर्तन्ते। न धर्ममनुधावन्ति, न सत्यमनुबध्नन्ति। परं तृणवद् उपेक्षन्ते स्नेहम्। अहितमिव परित्यजन्ति आर्जवम्।

**4.** अधोलिखितश्लोकस्य हिन्दीभाषया सरलार्थं कार्यम् – 4

(क) तं भूपतिर्भासुरहेमराशिं
लब्धं कुबेरादभियास्यमानात्।
दिदेश कौत्साय समस्तमेव
पादं सुमेरोरिव वज्रभिन्नम्।।

**अथवा**

(ख) न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनाम्।
जोषयेत्सर्वकर्माणि विद्वान्युक्तः समाचरन्।।

**5.** अधोलिखितासु सूक्तिषु मात्र ***द्वयोः*** सूक्तयोः भावार्थं हिन्दीभाषया लेख्यम् – 2 × 2 = 4

(क) दातव्यं भोक्तव्यं धनविषये सञ्चयो न कर्तव्यः।

(ख) उपार्जितानां वित्तानां त्याग एव हि रक्षणम्।



StudentSuvidha.com
downloaded from

NOTES and PAPERS at StudentSuvidha.com

(ग) योगः कर्मसु कौशलम्।

(घ) सुलभसौख्यमिदं बालत्वं भवति।

**6.** अधोलिखितं गद्यांशं पठित्वा अधस्तनानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लेखितव्यानि –

तावदकस्मादुत्थितो महान् झञ्झावातः, एकः सायंसमयः प्रयुक्तः स्वभाववृत्तोऽन्धकारः, स च द्विगुणितो मेघमालाभिः।

***प्रश्नाः*** – 2 × 1 = 2

(क) अकस्मात् कः उत्थितः ?

(ख) अन्धकारः काभिः द्विगुणितः ?

**7.** अधोलिखितं श्लोकं सम्पठ्य अधस्तनयोः प्रश्नयोः उत्तराणि संस्कृतभाषया लेखनीयानि –

बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते।
तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलम्।।

***प्रश्नाः*** – 2 × 1 = 2

(क) बुद्धियुक्तः के उभे जहाति ?

(ख) 'योगाय' इति पदे का विभक्तिः किं वचनञ्च ?

**8.** रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कुरुत – 2 × 1 = 2

(क) निष्क्रष्टुमर्थं चकमे कुबेरात्।

downloaded from StudentSuvidha.com



and PAPERS at StudentSuvidha.com

(ख) भगवान् यीशुस्तव मङ्गलं वितनोतु।

**खण्डः 'घ'**

**(संस्कृतसाहित्यस्य-परिचयः)**

**9.** महाकविकालिदासस्य ***अथवा*** पं० भट्टमथुरानाथशास्त्रिणः संक्षिप्तपरिचयः हिन्दीभाषया लेखितव्यः। 4

**10.** अधस्तनयोः पुस्तकयोः मध्ये ***एकस्य*** संक्षिप्तपरिचयः हिन्दीभाषया लेखनीयः – 4

(i) श्रीमद्भगवद्गीता।

(ii) कादम्बरी।

**खण्डः 'ङ'**

**(छन्दोऽलङ्कार - परिचयः)**

**11.** अधोनिर्दिष्टछन्दस्सु मात्र ***द्वयोः*** संस्कृतभाषया लक्षणोदाहरणौ लिखत – $2 \times 4 = 8$

(क) अनुष्टुप् (ख) वंशस्थम्

(ग) मन्दाक्रान्ता (घ) इन्द्रवज्रा

**12.** अधः प्रदत्तेषु अलङ्कारेषु ***द्वयोरेव*** लक्षणोदाहरणौ संस्कृतभाषया लिखत – $2 \times 4 = 8$

(क) उत्प्रेक्षा (ख) उपमा

(ग) व्याजस्तुतिः (घ) अनुप्रासः



downloaded from StudentSuvidha.com
nd PAPERS at StudentSuvidha.com

## खण्डः 'च'

## (अनुप्रयुक्त - व्याकरणम्)

**13.** 'गुणसन्धेः' ***अथवा*** 'यण्सन्धेः' परिभाषां सोदाहरणं हिन्दीभाषया लिखत। 2

**14.** 'कर्ताकारकस्य' ***अथवा*** 'सम्प्रदानकारकस्य' परिभाषां सोदाहरणं हिन्दीभाषया लिखत। 2

**15.** 'अव्ययीभावसमासस्य' ***अथवा*** 'द्वन्द्वसमासस्य' परिभाषां सोदाहरणं हिन्दीभाषया लिखत। 2

## खण्डः 'छ'

## [ बहुविकल्पीय - वस्तुनिष्ठप्रश्नाः ]

**16.** अधस्तनप्रश्नानां लिखितोत्तर-विकल्पेषु ***शुद्धविकल्पं*** चित्वा उत्तरपुस्तिकायां लिखत — 6 × 1 = 6

(क) 'सोऽपि' इति पदे कः सन्धिविच्छेदः ?

(i) सो + पि (ii) सो + अपि

(iii) सः + अपि (iv) स + अपि

(ख) 'तेन + एव' इति पदे किं सन्धिपदम् ?

(i) तेनैव (ii) तेनेव

(iii) तेनिव (iv) तेनव

(ग) 'गुरूपदेशः' इति पदे कः सन्धिः ?

(i) वृद्धिसन्धिः (ii) दीर्घसन्धिः

(iii) यण्सन्धिः (iv) अयादिसन्धिः



downloaded from StudentSuvidha.com
Download all NOTES and PAPERS at StudentSuvidha.com

(घ) 'प्रकृतिसिद्धम्' इति पदे विग्रहोऽस्ति ?

(i) प्रकृतेः सिद्धम् (ii) प्रकृत्या सिद्धम्

(iii) प्रकृतिः सिद्धः (iv) प्रकृतिः सिद्धम्

(ङ) 'तपोधनः' इति पदे कः समासः ?

(i) बहुव्रीहिः (ii) द्विगुः

(iii) द्वन्द्वः (iv) अव्ययीभावः

(च) 'न + आर्या' इति विग्रहे किं समस्तपदम् ?

(i) नार्या (ii) अनार्या

(iii) अनार्यः (iv) नार्यः

**17.** लघूत्तरात्मक प्रश्नाः — 10 × 1 = 10

(i) 'साधुभिः' इति पदे का विभक्तिः ?

(ii) 'युष्मद्' प्रथमाविभक्तौ एकवचने किं रूपम् ?

(iii) 'अस्ति' इति पदे कः धातुः ?

(iv) 'अगच्छत्' इति पदे कः पुरुषः ?

(v) 'पठित्वा' इति पदे कः प्रत्ययः ?

(vi) 'नि + धा + ल्यप्' एतेषां संयोगे किं रूपम् ?

(vii) 'परितः' इति उपपदयोगे का विभक्तिः ?

(viii) 'वित्तम्' इति पदस्य समानार्थकपदमस्ति।

(ix) 'अप्रियः' इति पदस्य विलोमपदमस्ति।

(x) 'सुकृतम्' इति पदस्य विलोम पदं लिखत।



downloaded from StudentSuvidha.com

...nd PAPERS at StudentSuvidha.com